हरिसं· श्रीसहजानंदायनमोनमः॥ यः कृपालुरखिलात्मसंश्रयोयः क्षराक्षरपरः श्रितावनः॥ मानुषाकृतिधरः सतांचरन् सर्ग ८
॥१॥ त्राणमेषममसंकटःस्वकृन्तुसदा॥१॥ अथकविः करुणरसंसमनुवर्णयन् श्रीहरिवांधववादीनां विलापप्रस्तौति व्रज
नामिति अथैवमयत्राकुनादिघृन्हसनंतरम् व्रजतामितस्ततोगच्छताम् हर्यन्वेषणायेतिशेषः तेषांसर्वजनानाम्
नयनेभ्यो नेत्रेभ्यः स्रवंतियानिजलानितैः उक्षिता सिक्ताताततसेकेतियावत् नमस्सायोधायाः क्षमाधरणीः क्षे
माधरित्रीधरणीसमरः पयोधरोमेघस्तस्मांवृनिजलानितैः परिसिक्ताइवअखिलासमग्रापंकिलाजातकर्दमा

व्रजतांनयनस्त्रवज्जलैरथ्यतेषांनगरक्षमोक्षिता॥ समलक्ष्यतपंकिलाखिलापरिसिक्तेवपयोधरांबुभिः॥१॥ वि
वन्नाः प्रणयोनतेऽखिलाबहिरागसपुरान्महीयसा॥ वनितामपिकंचदेहिनंसमपृच्छंस्तमतिव्यथातुराः॥२॥

समलक्ष्यत अत्राखिलधरासेकासंबंधेऽपिसंबंधाभिधानस्यातिशयोक्त्यनुप्राणितोत्प्रेक्षेसनयोरंगांगीभावेन
संकरः प्रस्वकृन्तम् विषमेपदिसौतगोसमेम्प्रस्ताजः प्रस्वकृमीरितमितिलक्षणात्॥१॥ विवन्नाइति अखिलाः
समग्राः तेजनाः महीयसा अतिमहताप्रणयेनप्रेमणाप्रणयास्त्वमी विश्रंभयाच्ञाप्रेमाणइत्यमरः विवन्नाः अ
स्वाधीनचित्ताः संतः पुराद्बहिः आगसआयोध्यायाबहिर्निष्क्रम्पकाममपिकमुखागतांवनितांभगवतिजनितास ॥१॥

र्थरागांज्ञात्वेतिशेषः वनिताजनितासर्थरागयोषितियोषित्वीविश्लेः तंदृशौत्तातातुरागंकमपिदेहिनंपुरुषंचज्ञात्वा
अतिव्यथयाअतिशयपाविरहव्यथयाआतुराः आकुलिताः संतः समपृच्छन् अस्मन्नीलकंठः अनेनपथा
व्रजन्क्वापिदृष्टः यदिदृष्टश्चेदस्मत्प्राणदानपुण्यमसमल्लाक्रथयेतिपप्रच्छुरित्यर्थः॥२॥ ततोऽग्रेअकांडआगन
कुमारिकाविशुद्धदानतज्ज्ञानान्मत्वापृच्छंतिसः मदिनोनीलकंठः अमुनाअध्वनामार्गेणगतः इतिधर्मचेतिशि
नमेवयदिकेनचित्क्वचित्परिदृष्टः वीक्षितस्तर्हिहेकुमारिकेवात्मत्वान्निष्कपटेहेत्रिविधोऽज्ञातप्रतारणधर्मवा

सगतोध्रुवमध्वनामुनापरिदृष्टोयदिकेनचित्क्वचित्॥ गदताशुकुमारिकेत्रिधाकरुणांवःकुरुतद्रुदुःखिनाम्
॥३॥ इतितेऽभिमुखागतान्नरानपिपृच्छुपाध्वनिभूरुहान्मथूनु॥ अप्रतिहर्षतयाभिरभ्यतान्परिपृच्छंतितनः स्मतांन
दीम्॥४॥ नहेहवृक्षरुत्वाकिन्नामनंधकवियोगकृः खपूयंगदतअस्मद्बंधुपरिचक्षतमस्हेवप्रसेकंवा सर्वेऽपिपूयं कः
खिनांनःविज्ञोकायकरुणांदयांकुरुतअथवाप्रसेकंत्वंकुरुतदय्याल्लो॥२॥ इतितिइतोऽस्त्यम् तेसर्वेजनाः अभिमु
खंस्वसन्मुखेआगताआयातास्तान् नरान्पुरुषान् तथाभूतान्पन्थनुगवादीन् भूरुहान्वृक्षानपि अध्वनिमार्गेप्रा
मानितिशेषः पृष्ट्वा अस्मत्करुनुघनद्रुमोदृष्टोयुष्माभिरिसमिपृच्छपतान्वक्रुमद्राक्यानपित्राक्रान्यारिकल्पन्त

हेयूयंरे कुमुद्युत्काः अतः आदौ आगच्छंतु परिरंभणं कुर्वंतु इत्युत्काः अतिहर्षं तया तान् परिरभ्य ततोऽपि तद्द्वंता
नामेतां प्रसिद्धानंदीमस्यूयं परिपृच्छंतिस्म॥४॥पश्चादपि चुतल्लता पृच्छा ररीतिमाह वचनमिति हे धेनवः प्रागपि युस्मा
ति प्रियायूयं अद्य एकं नो वचनं शृणुत आकर्णयत ननु वितर्के यूयं हरेः कृतरां अतिप्रिया येन मताः यूयं समामाज्ञ
अतः हरिः इत एव गतो भवति यदि युष्माभिर्वीक्षितः तर्हि कृतरां युष्माकं परपीडाविज्ञत्वात् दुःखितानुतक्रियाग
अथातुरान्नुनः अस्मान् तं हरिमाशु नूनं प्रदर्शयत॥५॥नन्तमितकर्णांघ्रदुलायतेक्षणान्हरिणान्नूनमैते हरिर्वि

वचनं शृणुताह्यधेनवो ननु यूयं कृतरां मता हरेः॥इत एव गतो यदाक्षितो हरिरादर्शयत तान् दुःखितान्॥५॥हरि
णाविपुलायतेक्षणाः स्फुरयेन्नक्षियुगानि वोगतः॥इत एव निरीक्षितो यदा स हरिने विदितप्रियस्तदा॥६॥

लोकित इति मत्वा कुहहरिणा इति हे हरिणाः मृगाः यूयं विपुलान्यायतानि ईक्षणानि नेत्राणि येषां तथाभूताः स्थ
अत एव वो युष्माकं अक्षियुगानि स्फुरयतु पुराबकुचननिवाससंबंधेन प्रियः प्रेमास्पदं सोऽस्माकं बंधुर्हरिः॥
इत एव अस्मादेव पथः सकाशात्॥गतः नो वंचयित्वा कुत्रचिद्गतः॥यदा निरीक्षितः युष्माभिर्दृष्टः स्यात्तदा तदिन
दानोऽस्मान् न विहरहमथाकरात्॥वदत कथयत पुनर्जीवितदानप्रदानवत्वान्महाफलं स्यादिति भावः॥६॥ ॥२॥

नन्विहित हे पलाशिनो वृक्षाः पलाशिंद्रुमागमा इत्यमरः अत्र लोके वो युष्माकं जनुर्जन्म परोजननतानां जनस
मूहानामुपकारं करोतीति तथाभूतमस्ति अतः परोपकारत्वाइत्वाद्धेतोः यदि हरिर्विलोकितो दृष्टः तर्हि नोः
संभ्रमं गदत ब्रूत ननु निश्चितमेवे ननु एतावास्तदर्थं कुतः प्रयासः क्रियते तत्राहः सबालविग्रहोऽस्मतनुर्भवति
नवयो महात्मतनुनां कापि भयत्राके तिभावः॥७॥संतानमनोज्ञपल्लवां चूतलतां भगवद्दृष्टानानंदवंतीं मत्वापपृच्छुः अ
यीति अयी सामंत्रणे हे अतिमाईवे अप्रतिम इगुणयुक्ते हे चूतलते आम्रलताख्ये नवरूदये सांतं कोमलं मंजुलं

ननु वो जनतोपकारकृत्तत्रुरस्मत्र पलाशिनो यतः॥गदते हविलोकितो हरिर्यदि नस्तर्हि सबालविग्रहः॥७॥अ
पि चूतलतेऽतिमाईवे रूदयं स्यादिति कोमलं तव॥इत एव यतः स वीक्षितं कथयेश्चंचलचारुचंक्रम॥८॥अयि वे
क्षि रसालवीथिके स्मरणीयं हरिमद्भुताकृतिम्॥कुहविकिमवेक्षितो यतः स हरिस्त्वां परितृप्तीलयन्रुचौ॥९॥

स्याज्ज्वेत्यतः आकृतिरेव गुणान्कथयति यत्राकृतिस्तत्र गुणा वसंतीति न्यायात्॥इति अनुमीयत इति भावः
इति हेतोः इत एव गतः चंचलः चपलः चारुः सुंदरश्चंक्रमो गमनं यस्य इत्थंभूतः स हरिः वीक्षितो दृष्टश्चेत्कथयेः
ब्रूयाः॥८॥अयि इति अयीति कोमलामंत्रणे हे रसालवीथिके आम्रश्रेणिके वीथ्यालिरावलिः पंक्तिरित्यमरः

स्मरणीयं गुणसागरत्वात् सदा स्मरणीयम् उत्कर्षेण गुणम् । अद्भुतासाश्चर्यरूपाकृतिराकारो यस्य तम् । हरिं त्वं
वेत्सि शुचौ ग्रीष्मे शुचिः शुक्रः ज्येष्ठ अनुपहन्ते शृंगाररसावादयोरपि श्रीकृष्णकृतवंदने पिस्ताद् इति विश्रुः धर्मस्यास्य त्वां प
रिग्रीष्मयन् परिचरन् परिचरन् सहहरिः कुरु चिंतनः यत्र कुत्रापि गतः त्वया अवेक्षितः वीक्षितः किम् यदीक्षि
तः कथयत ॥ ९ ॥ सख्येति हे सख्यु प्रतिवासरं प्रतिदिनम् त्वयि भवसां शुभां मनोहरां वकुलश्रीसौली लाकी आली
विदधत् । अभ्यस्तत्वाल्लुप्तप्रतिबंधः इत एव स्थानात् सत्वरं पश्चात् तथा गतवान् कतरेण त्वास्माकं च प्रियः प्रेमास्य
सख्युप्रतिवासरं शुभां वकुलीलां विदधन् त्वया ईक्षितः ॥ गतवानित एव सत्वरं यदि नो ब्रूहि सवेत्सि कः प्रियः ॥ १० ॥
अवली यत्किमद्य नः स्थितः क्वचिद्दैवे सपदाधुतेव्रज ॥ ननु दृष्टिपथं तदा प्रभो न हि जीवेम वयं त्वयांतरा ॥ ११ ॥
हमु सहरिः ईक्षितो भवसादृश्यः यदि वेत्सि जानासि तर्हि नो अस्माकम् ब्रूहि विरहिणां यल्लिप्तितास्य यानकुदंतनिवे
दनेन तच्छायापनोदेस्य हगपुण्यमतो वृंदस्यार्थ ॥ १० ॥ अवलीयेति यद्यद्य दिने अद्य दिने क्व चित्स्थलांतरे अव
लीय निलीय अस्मत्क्षेमाय लोकनाय तिन्त्रोपः स्थितः भवान् स्थितो भवति चेत्तदा हे हरे नो अस्मान् कुलं ग्रीष्मे
सआगस दृष्टिपथं नेत्रमार्गं व्रज आगच्छ हि हे प्रभो यतः त्वया अंतरा त्वां विना वयं न हि जीवेम अस्मत्त्वी चेनंन सादि ॥ ३ ॥

मर्थः ननु निश्चितमेवैतत्परिहासमात्रं ॥ ११ ॥ वनेति वनेति संबोधने हे रसे हे पृथ्वि त्वया भवसा महदसुत्कटं
परं परमात्मप्राप्तिसाधनत्वात् श्रेष्ठम् किं तपः अकारि कृतं ननु कथमेवमतितरां मत्संभावनासुत्कर्षे तयाक्वि
यत इति चेत्तत्राह यतः पुण्यं फलं धर्म इति यावत् तस्य तत्त्वज्ञवः पुत्रः तस्मो इत्तु संतावधिकं प्रीतमानो वोच र
णारविंदयोः स्पर्शेन साक्षात्स्पर्शसंबंधेन महानुभावो यस्माः तथाभूता उद्यद्भिर्विजृंभितैः पुलकै रोमांचैः नो
अस्माकं विभासि अन्यथा कथं वयमिव त्वमपि निरुत्साहा न भूयाद् इतिभावः ॥ १२ ॥ किमिति अथवेति पक्षांतरे
वत पुण्यतनूद्भवोद्गसच्चरणस्पर्शमहोत्सवा रसे ॥ किमकारि महत्तपस्त्वया परमुद्यत्पुलकैर्विभासि नः ॥ १३ ॥
किमयं धृतवामनाकृतेः परिरंभेण वराहवर्ष्मणः ॥ अथवा ननु सोऽवलोकितः समवाप्ता जगदीशितुर्हरेः ॥ १४ ॥
३ ध्वजपद्मयवांकुशादिभिर्ललितैरंघ्रिलसामभिस्त्वयि ॥ तनयन् हरिरूर्जितश्रियं क्व गतो ब्रूहि यतोऽसि नः प्रसूः
१५ ॥
धृतावामनाकृतिर्वामनरूपं शरीरं येन तस्य जगतामीशिता नियामकस्तस्य हरेर्भगवतः परिरंभेणालिंगनेन
अयं पुलकोद्गमः समवाप्तः किं वा वराहस्येव वर्ष्म देहो यस्य तस्य वाराहावतारस्य हरेः परिरंभेण न हि न हि त
योरतीतकालत्वात् इदानीमेवायसाक्षाद्धरिरवलोकितः ननु ॥ १४ ॥ ध्वजेति ध्वजश्च पद्मं च यवश्च अंकुशश्च

नानिव्यादयो येषां तैः अंघ्रिललाम अभिसरणविवेकैः त्वयि उर्जितानि प्रकाशमानानि सौख्यानि शोभावनाम् जन
यन्नुत्सादयन् हरिः कृगतः ब्रूहि वाक्यार्थेः कर्मयत त्वं नोऽस्माकम् प्रसह्य मातासि न हि मातृणाम् स्वपुत्रजाङ्घ्रि
खावलोकनं सह्यमिति भावः ॥ १४ ॥ अयीति अपि सामंत्रणे हे हरिः कुंदम क्षणदायां रात्रौ ईशः स्वामी तस्य
तर्जिता तिरस्कृता द्युतिः कान्तिर्येन तत् सापेक्ष्यत्वेऽपि गमकत्वात्समासः विलज्जितं शोभया क्षेपितं अंबुजं
कमलं येन तत् मधुरेण सुंदरेण स्मेरेण हासेन मनोहरम् आनंदकरं ते तव मुखम् अनवेक्ष्यानालोक्य कथं

अयि तर्जितनिर्मलद्युतिक्षणदेशस्य विलज्जितांबुजम् ॥ अनवेक्ष्य भवेम ते कथं मधुरस्मेर
मनोहरं मुखम् ॥ १५ ॥ परितो विरहातुरान्तरा हरिमन्विष्य मुकुः पुरौकसः ॥ इति तैः न धिग
म्य तं प्रियं निजवेश्मानि नानैर्ययुः ॥ १६ ॥

केन प्रकारेण भवेम जीवेम त्वन्मुखानवलो
कनेऽस्माकं तु कांदिशीकत्वं जातां जीवनमिति भावः ॥ १५ ॥ परित इति इत्यमुना प्रकारेण ते पुरौकसः
विरहेण हरिवियोगेनातुराण्यंतराणि अंतःकरणानि येषां ते तथाभूताः संतः परितो योध्याम् अभितः मुकुः पुनः पु
नः हरिमन्विष्य परिमृग्य प्रियं प्रेमास्पदं तं हरिम् अनधिगम्याप्राप्य शनैः शनैः निजवेश्मानि स्वस्वगृहाणि ययुर्जग्मुः ॥ १६ ॥

पतित इति सदने आगसेति शेषः सहसा पतितः अवशोऽस्वाधीनचित्तः तस्य हरेरग्रजो रामः प्रतापः पुनर्भूयो
ऽपि हे हरे हे मम अनुज मंजुलाति सुंदराकृतिर्यस्य तत्संबुद्धिः हे हरे कृष्ण हे प्रिय हे नीलकंठ कासि इति उ
च्चैरुच्चस्वरेण अलपत् विललाप ॥ १७ ॥ अकृतेति अंबुजवत्कमलवच्चारुणी लोचने यस्य तत्संबुद्धिः अकृत
मनाचरितम् आगोऽपराधो येन तम् आगोऽपराधो मंतुश्छेसमरः अग्रजं त्वमेव बंधुं मां परिहाय त्यक्त्वा तु तत्रागिद्ध

पतितः सदने वशः पुनः सहसोच्चैर्व्यलपत्तदग्रजः ॥ धुहरे नुज मंजुलाकृते हरिकृष्ण प्रियनीलकंठ मे ॥ १७ ॥
अकृतागसमग्रजं त्यक्तं परिहाय अंबुजचारुलोचन ॥ कृगतोऽसि करोमि मां हरे स्वजसि त्वं किमु बंधुवत्सल ॥ १८ ॥
शृणुयां कृगिरस्तवाद्भुतं कृ निरीक्षेय मनोरमं वपुः ॥ हसितं मदनस्मयापहं विरहाग्निप्रशमामृतोपमम् ॥ १९ ॥

कृगतोऽसि त्वामृतेऽहम् किं करोमि किं वदामि किमिति शेषः बंधवो वत्सला यस्य बंधूनां वा वत्सलस्तस्य सं
बुद्धिः हे हरे त्वं मां कृहावसरे इति शेषः त्यजसि किमुदयालोस्तवानुचितमिति भावः ॥ १८ ॥ शृणुयामिति हे हरे अ
द्भुतं तव गिरः कृ शृणुयाम् आकर्णयेयम् अद्भुतमाश्चर्यजनकम् मनोरमम् अतिकमनीयम् तव वपुः शरीरम् कृ नि
रीक्षेय पश्येय मदनस्य कामस्य स्मयो गर्वस्तम् अपहंतीति तथोक्तम् अमृतस्योपमा यस्य तत् तव हसितम् ।

हे विरहाग्निप्रज्ञाम वियोगाग्निज्वालामक कं निरीक्ष्य अमत्र रमणीयकत्वाभावात्त्वदीक्षणरूपास्मत्ती वनाप
हारेणैवापहारयन्त्यान्नृप्तावस्थानमुचितमिति भावः ॥ १९ ॥ अतीति हंसो मरालश्च गजेन्द्रः करिवरश्च ताविव गंतु
शीलं यस्य तस्य नव अद्भुतमसाधारणं यं कारकम् अतिदिक्षं यच्चरित्रं चरितं तत् चलनं स्वभावस्त्वरगमनं पारि
प्लवं चंचलं चा वेति स्पंदरूपं दीक्षणं समीक्षणं नतु स्मरतः चिंतयानस्य मे मम मनः विधुनोतीति खिद्यति ॥ २० ॥ हृद

अतिदिक्षचरित्रमद्भुतं चलनं हंससमजेंद्रगामिनः ॥ स्मरतो विधुनोति मे मनस्तव पारिप्लवचारुवीक्षणम् ॥ २० ॥
हृदयं सदयं निरीक्षितं सततं तेन नवनीतकोमलम् ॥ सहसैतदतर्कगोचरं पुरुकार्कश्यमुपेयिवत्कुतः ॥ २१ ॥ त्रा
रणागततापरुत्त्वया हरिनाम्नास्य च नो हि विश्रुतः ॥ अरुणद्धारितयाधुनाप्रभो कुरुषे सार्थमिदं नु भाति नः ॥ २२

हृदयमिति हे हरे तेन तव हृदयं स्वांतम् सततं निरंतरम् सदयं सकृपयम् नवनीतं सद्योघृतं तद्वत्कोमलं च निरीक्षितं
दृष्टम् एतत् हृदयं सहसा अकांड एव अतर्कस्य ऊहस्य गोचरो विषयस्तथाभूतं न भवतीति नाद्दवाय पुरुकार्क
श्यं वक्रकठिनत्वं कुतः उपेयिवत्कथं प्राप्तं नात्र हेतुर्मा ज्ञायतो ऽप्युपलभ्यत इति भावः ॥ २१ ॥ त्राणेति हे हरे त्राण
गतानां त्राणं प्राप्तानां तापान् त्रिविधपरितापान् हरतीति तथोक्तस्तस्य भावस्तत्ता तया ऽस्य च नो ऽस्माकं प्रियाम् हर ॥ ५ ॥

सा कर्षतीत्यस्याश्रिततापानिति हरिरिति यन्नाम तेन विश्रुतो विख्यातः अभवदिति शेषः हि निश्चितमेव पुरा तथा
विधनयाद्वरुदर्शनादिति भावः हे प्रभो अधुना सांप्रतम् इदं हरिनाम अस्मत्स्वातिरिक्तत्राणान् हरस्यपहरतीसे
दं नूनं तस्य भावस्तत्ता तया आत्मनिष्ठेह रूढप्राणहरणात्तेनेसर्थः सार्थमन्वर्थम् कुरुषे इदानीमाचरसि इति
नोऽस्माकम् भाति प्रतिभाति नु निश्चितमेव ॥ २२ ॥ अयीति हे हरे नेन तव आह्निकस्याह्निकं नित्यं तस्य सविधिनि सरुलादेः
कर्मणः सत्क्रियाविधिमनुष्ठानं तत्ताम् विधातुं कर्तुम् एष समयः कालो ऽपियात्यतिक्रामति न नु नर्हि सत्वरं तु भवतात्

अयियातिविधातुमेष ते समयस्त्वाह्निकसत्क्रियां हरे ॥ अपिधः कृच्छनापदि त्वया स्मनवभ्रुसो भयनीयते प्रिय ॥ २३
अधुना तव भोजनक्षणो द्रुतमायाभि न किं कृताह्निकः ॥ मयि कृपणयोऽस्तिनेसदा कथमौदास्यमिदं गतः प्रभो ॥
२४ ॥ एकां चिंतेति चेत्तंत्र वक्ष्ये अपीति हे प्रियवत्सल कुत्र न कदाचित् आपद्यापत्काले ऽपि प्रियः समयः त्वया अत्र
त्वाह्निकक्रियाविधुरः नस्पनीयते स्मन व्यतिक्रांतः यपपूर्वान्नियतेः कर्मणि लिट् ॥ २३ ॥ अधुनेति हे प्रभो वि
भो अधुना एतर्हि एतर्हि संप्रतीदानीमधुनासांप्रतं संप्रबेस मरः तव भवतः भोजनस्य भुक्तिक्रियाविधानस्य क्षणः
कालविशेषः निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षण इत्यमरः वर्तत इति शेषः अतः कृतं संपादितमाह्नि

हरिसं॰ कंल्लानसंध्यादिकर्म येन तथोक्तः सन् द्रुतं शीघ्रम् ॥ अथ द्रुतं त्रिषु शीघ्रविलीने विद्राणे इति मेदिनी किं नायामि सर्ग॰८
॥६॥ तेन त्वं मयि विषये रूक्षप्रणयः रूक्ष नरांस्नेहः प्रणयः प्रसवे प्रेमणि याज्ञा विश्रंभयोरपीति मेदिनी सदा निरंतरम्
अस्ति इदं परुषत्वं अस्माभिरनुभूतम् ॥ औदास्यमुदासित्वम् कथं केन हेतुना गतः प्राप्तः अंतर्विचारेण भूयसापि
मार्गितस्तद्धेतुर्नोपलभ्यत इति भावः ॥२४॥ प्रियेति हे प्रियबांधव सज्जनैः साधुजनैरीप्सिताः प्राप्तुमिष्टाः तेन त्वया गु
णा दयालुत्वादयः क्व इदं परुषत्वं रूक्षत्वम् क्व कार्कश्यं हृदयकाठिन्यम् क्व तु नो भयमेकत्र संगच्छत इति नाथः ननु द

प्रियबांधवसज्जनेप्सिताः क्व नु कार्कश्यमिदं क्व ते गुणाः ॥ प्रतिकूलविधेः स्फुटं सहं मम सत्त्वं सहसे सदाप्रियम् ॥२५
क्व च पूर्जितमात्ममार्दवं क्व च तत् चंक्रमणं विभीषणे ॥ किमु पादतलेन यथा हरे न भवेत्कंटककर्करादिभिः ॥२६॥ या

धुतया प्रसिद्धो हे हं किं करिनरुद्रयः नेमाहस्तनीति सहसा प्रकांडमेव स्फुटः सहं रूक्षतरं सोढुमनर्हकम् इदं त्व
द्वियोगरूपम् अप्रियं प्रियविरुद्धं दुःखम् तत्त्वं जातं यतनत् ॥ मम अति घोरदुष्कृतवतो मम प्रतिकूलविधेः प्रति
कूलजाताद्दैवादेव हस्तं नात्र तव किमपि दूषणमितिभावः ॥२५॥ क्वेति हे हरे जितं मार्दवम् मा इ चं पुष्पसौकुमार्यं
येन तथाभूतम् वपुस्त्वच्छरीरं क्व च विभीषणे अतिभयंकरे वने विपिने चंक्रमणं पर्यटनं क्व क्षो क्वनाश्चेमहदंन ॥६॥

रंसहं यतः हे हरे कंटकाः कर्कंध्वादिद्रुमांगानि चन्नर्कराः कुर्याश्रुताः आद्याये पांदर्भसूच्यादीनां तैः कंटकोन
ल्लियां क्षुद्रशत्रौ रोमहर्षादिकेषु केसे नैयोगिकादिदोषांक्तो साङ्गोमाच द्रुमांगयोरिति मेदिनी पादतलयोः श्चरणा
ग्राधः प्रदेशयोः अस्थापीडानभवेत्किमुभवेदेवेति काकुः अत्र विषमालंकार ॥२६॥ पिबेति हे अस्मत्तनुज निःस्था
नः पियासात्तृष्णासंजातास्येति पिपासितस्तृषितः तारकादित्वादितच् अतः इदम् नीरं जलम् पिब पियासात्तद
तृष्णोदन्याः धीतिरितिहैमः जिघत्सा बुभुक्षा संजातास्येति जिघत्सितो बुभुक्षितः अतो भुक्षि मिष्टान्नभक्षणम्

पिब नीरमिदं पिपासितः कुरु भुक्तिं च जिघत्सितोऽनुज ॥ इति हिंस्रसमाकुलेवने त्ववितेकं नु भवंतमत्रकः ॥२७

कुरु भुक्षायामशनायाजिघत्सेति हैमः ॥ अत्र पियासाजिघत्साशब्दाभ्यामितविपिपासित जिघत्सितशब्दौ
निष्पाद्यौ अन्यथा सांतात्तु प्रसंगे जिघत्सुः पिपासुरिति वस्सात् बुभुक्षितः स्यात् क्षुधितो जिघत्सुरशनायितः पि
पासुस्तृषितस्तृष्णक् इति च हैमे प्रयोगदर्शनात् इत्यमुना प्रकारेण हिंस्राघातुकास्तैः समाकुलं व्याप्तं तस्मिन् अत्रा
स्मिन् वने ऽरण्ये एकमसहायं भवंतम् को नु अविता कथयिष्यति अत्रेति विरहप्राप्तसहजसमाधो साक्षात् दृष्ट्वोक्तिः
यद्भ्रविताको ऽत्र भवंतमेकलमितिपाठे अत्र भवंतम् सर्वथा पूज्यम् एकलमेकाकिनम् कोऽविता इति योजना ॥२७॥

दूविसं॰ ॥ ७ ॥

संप्रतिपितरावुद्दिश्याह परलोकेति हे पितरौ शृणुतं निगाम्यतं किं तदित्यत्राह परस्यामौ लोकस्येति विग्रहः परेणं वि सर्ग॰ ८
नोष्पेणव कुलमिति कर्मधारयः तं गतावुपलब्धो युवायद्यस्माद्धेतोः प्रियस्यामौसूनुः पुत्रस्तस्य कलत्रं कुः
खेनापि सोढुमशक्यः दुःखकुरिसादिनाकृत्यार्थे खल् तं विधुरोग्रयावकं विधुरे विश्लेषः सगावोग्रयावकस्तं त्रि
गिस्तं विधुरंथ्रसवायेस्यात्कष्टविश्लेषयोरपीति वैजयंती अवाप्तुं नजीवस्थः प्राणान्नविभृष्यः किं तु तत्रसन्नि ।
धावेववसन इतिभावः तत्तस्माद्धेतोः पुरुभागपतः पुरुमहत् भाग्यं पुधात्मको विधिर्ययो सौ तथाभूतौ भवथ
परलोकगतौ स्फुः सहं प्रियसूनोर्विधुरोग्रयावकम् ॥ पितरौ शृणुतं नतौ विथोयदवाप्तुं पुरुभागपतो युवाम् ॥
२८ ॥ प्रियसाहसकर्मणा त्वया मम केनापि महेन सा विधे ॥ निहितोसि कुरंतवेदने विपबंधोर्विरहानलेद्भुतम् ॥ २९
इति शेषः अत्याद्यादिम्भत्पसंख्यानमिति पृथ्यमां तात्पसिः भाग्यं शुभात्मक विधोस्मा च्छुभाप्शुभकर्मणां तिवि
श्वः अहं तु तद्वियोगानलविप्लुष्टत्वाज्ज्ञाप्यहीन इतिभावः ॥ २८ ॥ इत्थं स विलपन दुःखिलसुपालभते युग्मेन प्रिये
ति हे विधे प्रियं साहसं कर्मयस्य तथोक्तेन त्वया कत्रा मम केनापि महेन सामहर्घेन करणेन अपसि अहमिस
र्थेः अयं अनसौ स्पस्मदर्थो नुवादे अहमसमर्थेपातिगणआस्थानेऽनतावज्ज्ञा संस्मृतेरस्मित्तगत्कृतानास्त्वया ॥ १ ॥

गतेयत्र कुमानपात्रमिति भारविः प्रायुक्त प्रियवंधोः प्रणयविषयीभूतमज्ञातुः कुरंतवेदने क्रूर्ह्मंथ्यमर्थविरह
नले वियोगाग्नौ दुःखं त्रीघ्रं यथाभवति तथा निहितो निक्षिप्तः निपूर्वाद्धधातेः कर्मणिक्तः ॥ २९ ॥ करुणेति हे वि
धे करुणा विधुरोदृयया विश्लिष्टः अत एव विधेर्विग्रहेष्वपि विधुरस्त्रा द्रुम्पाविष्टलिंगत्वात् धंदस्त्वं विधुरंस्पासरि
स्त्रेषेनद्वयोर्वकते त्रिक्षितिमेदिनी आगोः पराधस्तस्मान्निष्क्रांतानां निरादयः क्रांताद्यर्थे पंचम्येति नसुरूपः ।त
नुभाज्जां देहभृतां भृग्रामसंतं अहं यिवापी दयितास्त्वं निसर्गतः स्वभावेन क्रूरतरोऽसुग्रो भवसि अत एव हिंस्र
करुणाविधुरं निरागसां भवसि क्रूरतरो निसर्गतः ॥ भृग्रमर्ह यिवाति रिच्यसे तनुभाजामपि हिंस्रतो विधे ॥ ३० ॥
सकलाः प्रतिकूलतां गता युगपन्मे स्फुतरां कुतो ग्रहाः ॥ अप्रतुलापदि कोप्यगाय्यसी स विधत्तेन सहायतामि
ह ॥ ३१ ॥ नोऽध्यतिरिच्यसे घातुके भोप्यधिको भवसी समर्थः गोधादिकाद विरिचिधातोर्दिवादेरा इतिगणत्वाद्व
द्धपनो ॥ अत्र करुणाविधुरमिति पदार्थस्य क्रूरत्वसमर्थनात्सकलवाक्यार्थस्य हिंस्राधिकत्वसमर्थनाच्च प
दवाक्यार्थहेतुकाव्यलिंगयोः संकरः ॥ ३० ॥ संप्रसनिष्टलेग्रहानान्वां कतेमकत्वाइति सकलाः मे ग्रहाः सूर्यादयः
युगपदेककालम् स्फुतराम् संतम् प्रतिकूलताम् अननुकूलताम् कुतः कस्माद्धेतोः पंचम्यास्तसिल् गताः प्राप्ताः

पर्य्यायत्वन्मातुलद्युसतेनतुयुगपदितिभावः तस्मातिकूलंविविनक्ति इहत्यसमाम् इहमोह इतिसप्तम्यंता
दिदंमत्राद्धातहद्रस्यः इदमइत्रितान्नाद्देन्नाद्य अतुलापेदिसर्वातिरिक्तापदिविषयेलेषांमध्येकोप्येको
पिसम्रहः अप्रणीयसीमसत्याम् क्विचनविभजोपपदेइसादिनाअणुनाह्वादीयस्कनु ततउगितश्चेतिङीप्
सहायतामनविधत्तेनकरोति विपूर्वस्यदधातेर्धातोः क्रियासामान्यवाचिनोयोगपविन्राषपर्यवसानात् ग्रहे
नुग्रहनिर्बंधग्रहणेषुरणोद्यमेसूर्यादौपूतनादौचसैंहिकेयोपरागयोरितिविश्वः ॥३१॥ संप्रतिसहृदयका

रचितंपविनोपलेनवाहृदयंनीरतविष्टरेणमे ॥ यदवाप्यनदीर्यतेतमांबकदार्दर्ग्यप्रियविप्रयोगतः ॥३२॥ किमवेक्ष्य
ममासवः स्थिताहृदयेद्यापिवितानपल्लवत् ॥ अपहायसहात्मनागतेस्थिताःप्रेयसिमातिधार्ष्टर्यतः ॥३३॥

कस्यमुखेक्षाह रचितमितिनीरतविष्टरेणकमलासनेनब्रह्मणामेहृदयम्नुपलेनपाषाणेनतुपलः प्रस्तरेमणा
वितिवैजयंती अथवापविनावज्रेणरचितंनिर्मितम् कुतइत्यपेक्षायामाह यन्हृदयमपुरुदार्दर्गमतिदृढताम् अ
वाप्यप्रियविप्रयोगतः प्रियवियोगेन आद्याद्दित्वातसिः नदीर्यतेतमानातिरूयेनदीर्यतइत्यर्थः तिङश्चेतितिङं
तात्तमप् किमेतिङव्ययाद्दामद्रव्यप्रकर्षइतितिङंतादामुः स्यात् अतस्तर्कागोचरमस्यकार्कश्यमितिभावः ॥३३॥ ॥९॥

सांप्रतमस्त्वनुपावनभने किमितिहेप्रसवः प्रेयसिप्रियतमेतस्मिन्निति त्रिशेषः आत्मनायुष्माभिःसहमामाम्
अपहायसत्कागतेइरंप्राप्तेसति ममहृदये वितानपल्लवत् तुच्छसदने इवासमभ्यंताद्यतिः वितानंतुच्छमं
दयोरितिविश्वः निन्नांतंयस्युसदनमिसमरः अथिताङ्स्थिताः संतः अतिधार्ष्ट्यतो ऽतिनिर्लज्जत्वेन आद्या
दित्वात्तसिः अद्यापिकिमवेक्ष्यकिमवलोक्यस्थिताःतिष्ठतेः कर्त्तरिक्तः तद्धिधृष्टत्वादेव वि लंबनहीनायुक्तंकथ
मत्रनिषण्णाइत्यर्थः ॥३३॥ संप्रतितत्सुतविलापंविविनक्ति भृत्वामिति अथेतिभिन्नोपक्रमेत्रोकसमाकुलः ॥

भृत्वामग्रतवल्लदाहरेर्यल्लपञ्छोकसमाकुलोनुजः ॥ क्वगतोसिपतेथदूरतस्त्वदधीनंकरुणंविसृज्यमाम् ॥३४॥
गतयोःसविधेनिधायमांतवपित्रोर्वकुलानुरागिणाम् ॥ गतवान्कथमत्रचंचलःसलिलत्रातइवांबुजंहरे ॥३५॥

हरेस्तुतइत्याराम: हेअस्रुयते प्राणाधिपते त्वदधीनंत्वन्निघ्नम् अधीनोनिघ्नआयत्तइत्यमरः करुणंदीनम् ॥
माम् विसृज्यसस्काकृहूरतः कस्मिन्दूरप्रदेशे गतइतिकृनसर्वेष्विति विशेषः तदाहरिवियोगसमये अग्रतत
ज्ञामप्रलापवत् भृत्वामसमंतम् अल्पप्रक्लिलाप ॥३४॥ तस्मिन्प्रेमभरेणक्लिन्नोनुतस्तदतिरिक्तावलंबनमप
श्यन्विलपति गतयोरिति हेहरेतवसविधेसमीपेमांनिधायपित्रोर्मातापित्रोर्गतयोःसतोःचंचलःतिष्ठप

यस्त्वं सलिलत्रातोजलौघः अंबुजंपद्ममिव वकुलानुरागिणं वकुलोगाढोयो ऽनुरागात्प्रेमसोस्यास्तीतितम् मां
अत्रास्मिन्प्रदेशेऽसमप्रमाम्प्र्य विहायसन्कार्काकथंगतवान् जगाम यथाययः कमलंबुहमातित्तदत्वमांपुरमतस्त
वमत्सागोऽनुचितइतिभावः॥३५॥ उपयामीति हे वर्मनिधे करुणाकर अत्रास्मिंदेशे केवलमन्तः अमप्रेतोऽमम् आ
द्यादित्वाम्त्रसिः कमवितारंरक्षकम् निकषासमीपे अभितःपरितः समयानिकषाहाप्रतियोगेपीतिद्वितीया

उपयाम्यवितारमत्रकंनिकषानुर्मनिधेत्वदमतः॥ भवदंघ्रिनिषेवणाहतेप्रयितेनिर्दयताहिनोचिता॥३६॥ न
भविष्यतिन्त्रामेदयिनाभवताजीवितमुज्झितस्पमे॥ अगतस्पतदमसमाश्रयंपृथुरोमणःपयसेवसुप्रिय॥३७॥ अ
तिमंजुलतास्पदाकृतिंप्रियवीक्षंचभवंतमंतरा॥ क्षणदायुगवद्दयानिधेप्रभविष्यंतिममेवचासरा॥३८॥ उप
यामिप्राप्नोमि अतःभवतोयावंघ्री चरणौतयोर्निषेवणंपरिचर्यातस्मिन्नाहतेश्रद्धावतिमयितेतवनिर्दयतानिष्का
रुणंनोचितानसंभवतीत्यर्थः हिनिश्चितम्॥३६॥ कथमितिहेकप्रियकुर्मेदायिनाकरुणाकाशिणाभवताउज्झितस
सन्कस्पमेममजीवितम् पयसाजलेनोज्झितस्प तदमंतस्मात्सयसो ऽम्मम् आश्रयमवलंबनंम् आगतस्पाप्राप्तस्प
पृथुरोमणोमीनस्पेवनभविष्यसेव अतोमत्प्राणरिरक्षिषयात्वयाप्रसक्षोभवितव्यमितिभावः॥३७॥ अतीतिहे ॥९॥

दयानिधे अतिमंजुलतास्पदाकृतिं अतिमंजुलमतिसुंदररूपंतत्स्वभावस्तन्त्वातस्याआस्पदंस्थानमाकृति
र्यस्पतंतथोक्तम् प्रियवीक्षंप्रियदर्शनम् भवंतमंतराममवासरादिनानिक्षणदारात्रयस्तद्युगवदेवप्रभविष्यं
ति॥३८॥ विधुरेति हरिविर्भुजा आगतिनापरितापितम् अयोलोहमपि कर्कत्रातांकठिनतामृदुत्वंतत्क्षणमेवत्य
जतेमार्दवंमृदुत्वंचयातिप्राप्नोति मेममहृदयंतु अतितीव्रवियोगवह्निनाअतितीक्ष्णविधुरानलेनपरिता

अतितीव्रवियोगवह्निनाहृदयंमेचनयातिमार्दवम्॥ परितापितमप्ययोद्रुतंसततेकर्कशतांहविर्भुजा॥३९॥ अथ
बांधवयोषितोहरेर्बकुलकेश्रवितप्रमानसा॥ जगदुस्तदवेक्षणाहतानिरुदसःसुतरांनिराश्रया॥४०॥ हरिरू
दमदयापयोनिधेननुहीत्वावनितानिताश्रया॥ सहसाखिलबांधवप्रियकृगतस्तन्नतवोचितंविभो॥४१॥ प्रिंतं
सदृपितानसत्ततेत्समुनयाति अतस्तस्मादप्यस्पातिकार्कश्यमस्तीतिभावः॥३९॥ सांप्रतंयोषिद्विलापंविवृणोति
अथेति अथत्रानंतरंबहुभिर्न्नोपक्रमेवकुलकेश्रवितप्रमानसाः वकुलकेशोनादक्षदुःखेनवितप्रमानसंयासांताःतद
वेक्षणाहताः तस्पहरेरवेक्षणेऽवलोकनेआहृताआदरवत्सः निराश्रयाः आश्रयश्रमाश्रयाःहरेःबांधवयोषितः
संबंधिजनस्त्रियः संतिताःकतरामत्यंतम् विरुदसःसाश्रुनेत्राःसत्यः जगदुरूचुः॥४०॥ हरिरितिहेदयापयो

निधे हे विभो अस्मद्दुःखप्रहाणसमर्थ हे अखिलबांधवप्रिय अखिलाये बांधवास्तेषां प्रियस्तत्संबुधिः ए
तद्द्वितीयेषणविशिष्टं हे हरि हृदिस्थमनिजाश्रयाः निजः स्वकीयः आश्रयो यासां ताः वनिताः स्त्रीः सहसा अकस्मा
त् हीत्वा मस्कात् कस्मिन्प्रदेशे गतः तदस्माभिरिंसितनमु तवनो चितं नाईभवति ननु निश्चितं ॥४१॥ त्वदिति हे
अस्रपते प्राणाधिपते हे प्रियकारिन् हितकर्त्तः हे हरे त्वदवेक्षणानिर्वृताः तवावेक्षणेन दर्शनेन निर्वृत्ताः स्र
खं प्राप्ताः अतराव वासरान् दिना निगमयंस्तो निर्गमनं कुर्वस्मः वयम् त्वया विसर्जिताः स्वन्काः मसः क्षणमपि

त्वदवेक्षणानिर्वृता वयं गमयंसो ऽस्रपते हि वासरान् ॥ अपि नेतुमलं क्षणं हरे प्रियकारिन्न विसर्जितास्त्वया ॥
४२॥ अपि निर्दयतामुपेयुषो भवतः स्त्रीषु विधेन सोचिता ॥ अपि हंति विहृरयन्नमूर्नन्नारारुः कथमस्मद्दहंसि नः ॥
४३॥ नेतुं निर्गमयितुं नालं न समर्थाः स्मः हि निश्चितम् ॥४३॥ संप्रति विधिमुपालभंते अयीति हे विधे निर्दयतां
जनेषु निःकारुण्यम् उपेयुषः प्राप्तवतः अपि भवतः स्त्रीषु सा निर्दयता नो चिता नयोग्याः उपेयिवाननाश्वानन्
पानश्चेति निपातसिद्धेयमुपेयिवच्छब्दः कुतदस्य पेक्षायामाह नारारुर्धातुको पिनारारुर्घातुको हिंस्रः समरः
अमूः स्त्रीर्न हंति न मारयति त्वं तु अद्य अस्मिन्समये तमिति शेषः तं हरिम् विहृरयन् दूरं कुर्वन् सन्नो ऽस्मान् ॥१०॥

कथं हंसि अतस्तव सर्वातिरिक्तनिर्दयत्वमस्तीति भावः ॥४३॥ अयीति अयीति संबोधने हे धातः विधे त्वया
नारीषु स्त्रीषु विगर्हिता निंदिता इयं वक्ष्यमाणा धृष्टता निर्लज्जता उचिता किमु नो चिते समर्थः साकेसयेक्षा
यामाह नो ऽस्मान् दृष्टबांधवात् प्रियबंधुरूपात् हरेः वियोज्य एथ्वक्कृत्य ज्वलिते दीप्यमाने विरहाग्नौ वियोगान
ले त्वं परिदाहयसि दहनं कारयसि अतस्त्वं विगर्ह्य इति भावः ॥४४॥ सांप्रतमिष्टसंगतिं विधाप्य वियोजयसी

अयि धातरियं विगर्हिता किमु नारीष्वपि धृष्टतोचिता ॥ परिदाहयसीष्टबांधवाद्विरहाग्नौ ज्वलिते वियोज्य नः ॥
४४॥ द्रुहिण प्रणयेन देहिनस्तव संयोज्य सनिरर्थमीहितं ॥ स वियोजयतश्चिरं गुणैरविलक्षितं तानवाप्तनर्मणः ॥४५
कृतमङ्गवदक्षिणो विधे तव येनाखिलसृष्टिमोष्टवम् ॥ करुणाविधुरत्व वार्पितं समपक्षपातमतदेकदेशगतः ॥४६

ति ब्रह्माणमाक्रोशं सच्छाकुः द्रुहिणेति हे द्रुहिण विधे देहिनः प्रणयेन स्नेहेन संयोज्य संगतिं विधाप्य परस्परमि
ति शेषः अनवाप्तनर्मणः अनवाप्तमप्राप्तं नर्म परस्परसंबंधजं सुखं यैस्तांस्तथोक्तान् तान् देहिनः त्वरितं
शीघ्रं यथा भवति तथा स वियोजयतः पृथक्तया वियोगं कारयतः तव निरर्थं बालस्येव ईहितं चेष्टितम् निरर्थं निः
प्रयोजनमस्ति अतस्त्वं निरनुकंपो मुग्धश्चेति भावः ॥४५॥ किंच दत्तापहारित्वेनातिक्रूरस्त्वमित्याकूः कृतमिति

हरिसं॰ हेकरुणाविधुरदयाहीन हे विधेत्वयाऽर्पितंरत्नम् नोऽस्माकम् अक्षिनेत्रम् अद्भुतवत् अज्ञपुंसेवसेनतुल्यं सर्ग॰ ८
॥११॥ क्रियाचेद्भवतिशिशितिरत्नो यांनाहृतिः हृतंमुषितम् ननुमयायुष्मद्धांधवोहरिरेव हृतोनयुष्मच्चक्षुरितिचेत्तत्राऽऽ
येनत्वदर्पितेनाक्ष्णा नवऽप्रखिलसृष्टिसौष्ठवंममग्रतगद्रचनाचातुर्यम् तदेकदेशात्तः तस्यहरेरेकदेशोनेत्रव
कटाक्षो ऽआह्लादिलावण्यमिः ममपत्त्रणामसमालुलोकिरेतदक्षिहृतमितिसंबंधः ममसकलजगद्रचनाचातुर्य
श्रीभिर्विदितमितीर्ष्ययेवतंहरीकुर्वन्नस्मानंधीभूताविधत्सेइतिभावः॥४६॥संप्रतिप्राणप्रेयांसमपहरन्ता
तमनार्यभवानसुप्रियंविषयंहूरतरंनिनायनः॥ऽअसुभिःकिमकारिकल्मषंनयतेमूलवतःसमीरहन॥४७॥वि
पिनेनिरूपानहःप्रभोचलतःसान्वकथंव्यथातव॥व्यसनंपविघातसन्निभंस्मरतांनहृदिजायतेहिनः॥४८॥ त्वया
कथंनःप्राणानोपकृताइतिब्रह्माणमुपालंभतेनमितिहेऽनार्यऽअसाधोभवाननोऽस्माकम् अरूप्रियंऽअसवः
प्राणास्तेभ्योपिप्रियंतंहरिम्हूरतरंविषयंऽअतिदूरेदेशेनिनायप्रापितवान् नयतिधातोर्योगेऽऽकथितंचेतिसू
त्रेणाधिकरणाविवक्षायांकर्मसंज्ञत्वाद्विषयमितिद्वितीयायतोयस्माद्धेतोःसमीरहनःचेष्टांकुर्वतःऽअसवःप्रा
णान्भवाननयतेतस्माद्धेतोःऽअसुभिःकिंकल्मषंपापम् अकारिकृतम् कर्मणिलुङ्॥४९॥इदानीप्रणयभ ॥११॥

इतिव्याकुलितांतःकरणास्तस्यकाननचंक्रमणाव्यथांस्मरंतःप्रोचुःविपिनेइतिहेप्रभोहरेविपिनेवनेचलत
तोगच्छतःनिरूपानहःनिःपादुकस्यपादत्राणवर्जितस्येतियावत् ऽअथपादुकापादरूपानत्स्त्रीसमाःतवव्यथाइ
ःखम्कथंनस्यात्स्यादेवेत्यर्थः तद्दरणपचंक्रमणतंदुःखम् स्मरतांनोऽस्माकम् हृदिपविघातसन्निभंपवेर्वज्रस्यघो
घातऽआस्फालनंतेनसन्निभंतुल्यम् व्यसनंदुःखम् जायतेहिनिश्चितम् इत्थंवयंत्वद्व्यसनंजानीमस्त्वंतुत्वद्विरहा
न्नलविप्लुष्टदेहानांनस्तदविंदन्नक्षिविषयोनभवसीतिभावः॥४८॥इदानीतस्यदयानुदयमन्ववगाहमानाःप्रो
पन्नगावोविरुदंतिपत्रिणःश्रुतवंतोरुदितंभृशंचनः नवयेहृदयेदयोनकथंतेपिमहीरुहाहरे॥४९॥नवकोकनदा
तिमंतुलंचरणंचंक्रमचंचुमंचितम्॥नलचक्रमरीचिरोचिषंदययाद्रींयपेत्रांगुलिम्॥५०॥ चुःपन्नगावइतिहे
हरेनोऽस्माकम्भृशमत्यंतम्रुदितंश्रुतवंतःपन्नगावोगवादयःपत्रिणःपक्षिणोमयूरादयश्चविरुदंतिऽअश्रूणि
मुंचंतियेमहीरुहावृक्षास्तेपिमधुस्रावमिषेणरुदंतितथापितिर्यग्षःतवहृदयेदयोदयःदयायाउदयऽप्रावि
र्भावःकथंनभवतिपरमदयालोस्तवनिर्दयत्वमनुचितमितिभावः॥४९॥सांप्रतंतदंगसौंदर्यसस्मृत्यतदुर्गनंप्रा
र्थयंतःप्रोचुःमवेतिनवंतत्क्षणविकसितंयत्कोकनदंरक्तकमलंतेनसादृश्यतिमंजुलमतिसुंदरम् चंक्रमेण

ज्ञाग्निगमनेनवित्तोज्ञातः चंक्रमचंचुस्तम् तेनवित्तश्चंचुश्चणपावितिचंचुप्प्रत्ययः नखाएवचंद्रानखचंद्राः इ॰
तिकर्मधारयः तेषांमरीचयोरस्मयस्तेरोचिः कौतिर्यस्तम् पेशलाः कोमला अंगुलयोयस्तम् अंचितम् ०
ङ्घिः पूजितम् तवेतिन्नोषः चरणम् त्वंदय यादर्शय ॥५०॥ प्रवेतिनवंनवीनंयस्महवंप्रवालः तस्कर्त्तपतिभक्नीय
नीतितथाभूतंमार्दवंयस्य तत्तथोक्तम् निजैर्भक्तैराप्तुमिष्टम् आप्नोतेः सन्नन्तात्कर्मणिक्तः मनोरमंमनोज्ञम्
वर्त्तुलंतवजंघयोर्युगलंयुगमंतंआश्रुत्रीघ्रंदर्शयेतिपूर्वेणानुषंगः स्तवमुक्तस्त्रापिदृष्टव्यम् द्विपहस्तप्रव

नवपल्लवनर्जितमार्दवंयुगलंवर्त्तुलमाशुजंघयोः ॥ तवसक्थियुगंमनोरमंद्विपहस्तप्रवरंविजेप्सितम् ॥५१
हरिणेंद्रकटिप्रवर्ज्जिनीविलसन्नाभिवरोदरंकटिम् ॥ परिणाहिसमायतोन्नतंभुजमध्यंनयनोत्सवास्पदम् ॥५२

रंद्विपोगजस्तस्यहस्तः करस्तस्मात्प्रवरमतिश्रेष्ठम् मनोरमंनिजेप्सितमतवसक्थियुगंऊरुयुगलंदर्शय ॥
५१ ॥ हरिणेतिहरिणामृगास्तेषामिंद्राधिपस्तस्ययाकटिस्तांप्रकर्षेणतर्जयतितिरस्करोतीतितांतथोक्ता
म् ॥ कटिंश्रोणिम् त्वंदर्शय विलसंतीशोभमानानाभिर्यस्मिंस्तत्तथाभूतंवरंश्रेष्ठमुदरंदर्शय परिणाहोविस्ता
रस्तत्परिणाहोविद्यतेस्मरः सोस्यास्तीतितत्तथोक्तंसममन्यूनताधिकत्वरहितंआयतंदीर्घंउन्नतंतत्तरम् ॥१२॥



तदुत्तच्चतम्बेतितथोक्तम् नयनानांचक्षुषांयउत्सवआनंदभरस्तस्यास्पदंस्थानम् भुजयोर्बाह्वोर्मध्यंवक्षः
दर्शय ॥५२॥ नखेतिहेप्रभोहरेनखाएवसन्मणयः श्रेष्ठोपलास्तेषांराजीपंक्तिस्ताभ्यांराजितंशोभितम् नलिनं
पद्मंतस्यछायाकांतिः सेवछायायस्यतत्तथाभूतंविलसच्छोभमानंपत्त्राण्ययोः पाण्योर्द्वयमुदर्शय छाया
सूर्यप्रियाकांतिः प्रतिबिंबमनातपःस्मरः त्रायुः त्राण्याहियालिप्सितिविष्णुमेदिन्यौ तलजंत्रयस्तः तलजंत्रां०
रवपद्मयोरितिस्मरः तस्योपमासादृश्यंयस्यतत्तथोक्तम् अतएवललितंमहायोगिनामपिमनोहरत्वादति

नखसन्मणिराजिराजितंनलिनछाययुलसत्करद्वयम् ॥ ललितंत्रलतोपमंप्रभोनचकंचंस्कतरंदिदृक्षितम् ॥
५३॥ लपनंस्मितकांतिभास्वरंजितपूर्णद्विजराजनीरजम् ॥ अनिचाप्यभवाकुलाश्रुनोननुपास्यंसमचोद्यव०
र्मतः ॥५४॥
कंदरम् कलशंनिरंतरम् अस्माभिरितिविशेषः दिदृक्षितंप्रेमातिशयेनद्रष्टुमिष्टम् ॥ नचकंचंग
लम् दर्शय ॥५३॥ लपनमितिस्मितमीषद्धास्यंतस्यया कांतिः शोभातयाभास्वरंप्रकाशमानम् पूर्णः यो
दृत्राकलायुक्तोयोद्विजराजश्चंद्रश्च द्विजराजः चंद्राधरोनक्षत्रेशः क्षपाकरःस्मरः तस्मात्सोमोराजानोवा
ह्मणानामितिश्रुतेः नीरजंपद्मंचतेद्वेजितेस्वासाधारणश्रियापराभूतेयेनतत्तथोक्तम् लपनंवक्त्रम् ॥ त

आस्यं वदनं तुंडमाननं लपनं मुखमित्यमरः अनिवार्य अनिवारणमप्य अनिरीक्ष्यै सर्वैः चार्यपूजानिवारणम 
नयोरिस्मात् समानकर्तृकयोरित्यादिना विहितस्य क्त्वाप्रत्ययस्य समासेऽनञ्पूर्वे क्त्वो ल्यबिति ल्यबादेशः
भृशमसंतमाकुलाः नोऽस्माकम् असवः प्राणाः अद्य वर्ष्मतो देहात् पंचत्वमाप्तास्सलिलं यास्यंति ननु च निश्चि
तमेव गात्रं वपुः संहननं शरीरं वर्ष्म विग्रह इत्यमरः चोऽवधारणे चान्वाचये समाहारेऽन्योन्यार्थे समुच्चये पक्षां
तरे तथा पादपूरणेऽप्यवधारणे इति रुद्रः ॥ ५४ ॥ समेति समे चारुतरे अप्रतिकंदरे च ये श्रवसी कर्णौ कर्णौ शब्दग्रह

समश्चारुतरश्रवोयुगं तिलमाल्यप्रतिमां च नासिकाम् ॥ निजकार्मुकचारुताभवस्मरदर्पक्षयकारिणीं भ्रुवम्
५५ ॥ भविता विपुलायतोन्नतं कलं ललाटं तव नोऽक्षिगोचरम् ॥ दययावनिताक्षदर्शनं भवता देयमसंततं इनम् ॥ ५६

होऽप्योत्रं श्रुतिः स्त्री श्रवणं श्रवः इत्यमरः तयोर्युगं युगलम् तिलमाल्यं तिलपुष्पं तस्य प्रतिमा उपमा यस्यास्तां त
थोक्ताम् नासिकां च निजं स्वकं कार्मुकं धनुस्तस्य या चारुता सुंदरता तस्याः भवो जातो यः स्मरस्य कामस्य दर्प
गर्वस्तस्य क्षयकारिणीम् भ्रुवं भ्रूकुटिं च अनिवार्यमाणोऽस्माकं वर्ष्मनो यास्यंतीति पूर्वेणानुषंगः ॥ ५५ ॥ भविते
ति विपुलं विस्तीर्णं आयतं दीर्घं उन्नतं तुंगं तत्त्रयं तच्च तन्नेति तथोक्तम् तव कलं ललाटं अतिमनोहरभालं कदेति ॥ १३ ॥

शेषः नोऽस्माकम् अक्षिगोचरं दृष्टिविषयम् ॥ भविता भविष्यतीति भवद्दर्शनाभिलाषिणीर्युवनितास्या अस्माकु
भवता कर्त्रा दयया करुणेन अत्र मणितो विरहदुःखस्य संतंडनमायातो नाशो यस्मात्तत्तथोक्तम् दर्शनम् देयमर्पणी
यम् अन्यथा देहे अस्मत्प्राणाः स्थास्यंतु न तु कथंचिदिति भावः ॥ ५६ ॥ इत्थं विलपंतीनां स्वविरहानलदंदह्यमानांगानां
तासां हरिः स्वयमाविर्भूतस्तत्त्रायं त्रामयामास सा हयुगमेन इतीति इत्थमुक्तप्रकारेण कविलप्य वक्तृविलापं कृत्वा
मूर्छितां मूर्छां प्राप्ताः विरहो हरिवियोगः स एवाग्निस्तेन ज्वलंसः अंगानि वल्लिका इव यासां तास्तथोक्ताः ताः

इति ताः कविलप्य मूर्छिताः परिदृश्यात्म निरीक्षणेन हरिः ॥ समवीवृशमदंबुदो यथा विरहाग्निज्वलदंगवल्लिकाः
५७ ॥ पुरवासिजनांश्च बांधवानुपदिश्यात्मयथार्थबोधनः ॥ अथ तत्र तिरोहितो प्रिये दिवसान्निसुखं दीर्घतरं कुण
न् ॥ ५८ ॥ स्त्रीः हरेः परिदृश्यत्वं आत्मनः स्वस्य निरीक्षणं दर्शनं येन स तथोक्तः सन् विरहाग्निना तेन ज्वलंसः अं
गानि वया वल्लिकाः ताः अंबुदो यथा मेघ इव तथा समवीवृशमत् सम्यक्त्रामयामास ॥ ५७ ॥ पुरेति पुरवासिज
नान् अयोध्यानगरीनिवासिनः स्वविरहेण शोचतः इति शेषः बांधवान् रामप्रतापादीश्च उपदिश्य शिक्षितं आत्मनः
स्वस्वरूपस्य यथार्थतत्त्वतो बोधनं येन स तथोक्तः सन् हरिः समवीवृशदिति संबंधः अथ तत्क्षणांतिकरणानंतर

मुषिते तत्र तस्मिन् हरो तिरोहिते तन् हिते सति तस्य हरेः गुणान् दयालुत्वादीन् उदीर्य उपगीय ते सर्वे जनाः दिवसान् दुः
खेन निसु र्निगमयामासुः ॥५८॥ इत्थं विलापयं निरूप्येदानीं प्रहृतमाह कौपीनेइति अथोनन्तरं भिन्नोपक्रमोः
कौपीने कृत तदाच्छादने तयोः कौपीनयोराच्छादने आवरके वस्त्रे बहिर्वाससी च कमंडलुं सुशुभ्रे मंगले विन्नालेवि
तते भाले ललाटे चंद्रकयुतं तिलकस्योर्ध्वपुंड्रस्य सद्मं चिह्नं लक्ष्म च कंठे गले तुलस्याः धनानि काष्ठानि तेभ्य उ

कौपीने सकमंडलुं परिदधत् तदाच्छादने मच्छिह्नं तिलकस्य चंद्रकयुतं भाले विन्नाले स्तु भे ॥ सूक्ष्मां सत्तुलसीधनो
त्तु पमथो कंठे च मालाद्वयं सर्वैर्नागजपमालिकां वरकरे यज्ञोपवीतं सितम् ॥५९॥ बिभ्रत् सिंगतटात्त छटां कटितटे
मौंजीं नवां मेखलां नालग्राम निषेवणं प्रतिदिनं कुर्वन् दयांभोनिधिः ॥ चंचत् चीरचमूरुचर्म वसनो नीलांबुदाली
प्रभः श्रीमन्नैष्ठिकवर्णिवेषरुचिरः कृष्णो वितृष्णो बभौ ॥ ६०॥ ऊर्ध्वोत्तनिर्यस्य ततथोक्तमस इत्यंस सूक्ष्ममाला
द्वयं च वरकरे श्रेष्ठहस्ते जपमालिकां च सितं शुभ्रयज्ञोपवीतं ब्रह्मसूत्रं च वामांसे इति शेषः परिदधत् सर्वेषां पराव
रेषां ईशोनियामकः स हरिः बभौ रेजे इत्युत्तरेणान्वयः वृत्तं तु पूर्वमुक्तम् ॥५९॥ बिभ्रदिति पिंगतटाच्छटां पिंगाः
पिंगलाः याजटाः केशास्तासां छटा समूहस्तास् बिभ्रत् दधत् मूर्द्धि इतिशेषः कटिरेवतटस्तस्मिन् मौंजीम् मुंजु 

तृणविकारोषस्तस्य विकारस्तां तथोक्ताम् । तस्य विकार इत्यण् ततः टिड्डाणञित्योदि ङीप् । नवां तत्कालमेवर
चिताम् मेखलाम् बिभ्रत् शालग्रामस्य गंडकीपुत्रस्य विष्णोः निषेवणं परिचर्याम् । कुर्वन् दयांभोनिधिः करुणा
पारावारः चंचन् उल्लसन् चीरं वल्कलं तच्च चमूरोर्मृगविशेषस्य चर्म च तत्च तते वसने यस्य स तथोक्तः नीलाः कृष्णा
माश्रुते अंबुदा मेघास्तेषामालिः पंक्तिस्तस्याः प्रभेव प्रभा कांतिर्यस्य स तथोक्तः निष्ठामंत्यं व्रतांतं गच्छति प्राप्नो
तीति नैष्ठिकः गच्छतो परदारादिभ्यः इतिठगधिकारे वार्त्तिकात् ठक् तस्येकादेशः निष्ठानिष्पत्ति नाशांतादृसमरः
वर्णः ब्रह्मास्ति रस्यास्तीति वर्णी तदुक्तम् । स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम् । संकल्पोध्यवसायश्च क्रि
यानिर्वृत्तिरेव च ॥ एतन्मैथुनमष्टांगं प्रवदंति मनीषिणः ॥ विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणम् । एतदष्टवि
धमैथुनाभावः ब्रह्मास्ति वर्णी ब्रह्मचारिणीति निघसयः सचासौ स च तस्य वेषो नेपथ्यं श्रीमांश्चासौ नैष्ठिकव
र्णिवेषश्च तेन रुचिरो रमणीयः वितृष्णा तृष्णाभक्तजनानां विषयफलाभिलाषो यस्मात् स तथोक्तः कृष्णः कर्ष
ति जनानां मनांसि कृष्णः स्वानि चेति तथोक्तः सः बभौ पद्यापि कर्षेर्वर्णे इति वर्णवाचकेवन निहितस्तथापि वाक्
लका हरेर्विनापि न कृ ॥ ६०॥ इत्थं वर्णिवेषाधरस्य तस्य सच्छास्त्रव्यसनितामाह श्रीमद्भागवतेति दिव्यान्मने
वसंभाव्यान्सरस्येयाः सम्यगाणेकतानेहतुकनिरवधिकातिवाय्यस्यादयोपेः प्राकृतागुणास्तेषामर्णवोऽब्धिः

अत एव अस्मद्भृतां देहिनो निर्वाणो मोक्षः निर्वाणो निर्वृत्तो मोक्षे विनाशो गजमुक्तानेदु इतियादवः तं करोतीति
तथाभूतं वीक्षणं दर्शनं यस्य स तथोक्तः वनरुचिः अरण्यवासाभीष्टः स्फुटदुष्करं मनुजैः स्फुततरां कर्तुमशक्यं य
त्तपो ऽनन्यानां दिव्यलक्षणं तस्य या लक्ष्मीः शोभा तया प्रदीप्ता देदीप्यमाना आकृतिर्देहो यस्य स तथोक्तः आदी
नवो दोषस्तेन सहिताः पापिपुरुषाः तेन सहेति तुल्ययोग इति बहुव्रीहिः तेषां नास्ति दर्शनं यस्य स तथोक्तः
तपश्चांद्रायणादिलक्षणम् कुर्वतां विदधताम् मुनीनाम् श्रेयान् प्रियतमः द्विवचनविभज्ये सादिना ईयसुन्

श्रीमद्भागवतादिसारमस्मद्भृन्निर्वाणकृद्वीक्षणो विन्ध्यारण्यो व्रतिवासरं वनरुचिः आदीनवादर्शनः ॥ सूक्ष्मंपु
स्तमसौ स्फुटदुष्करतपोलक्ष्मीप्रदीप्ताकृतिर्दुष्करे दिव्यगुणार्णवस्तद्विचितं प्रेयांस्तपः कुर्वताम् ॥६१॥ ततः प्रि
यस्थिरे सादिना प्रियस्यात्र श्रीमद्भागवतं आदिर्येषां स्कांदभारतधर्मागमानां तेषां सारो रहस्यं यस्मिंस्तत्त
थोक्तम् सूक्ष्ममल्पम् पुस्तं पुस्तकम् पुस्तं तु पुस्तके लेप्यकर्मविज्ञानयोरपीति महेश्वरः विन्ध्यारण्योद्यानः
असौ हरिः व्रतिवासरं प्रतिदिनम् तद्विचितं तस्य सारस्य उच्चितमभ्यासं चक्रे कृतवान् ॥ रहस्यागमसागेव श्री
मद्भागवतादिसारं स्वमनीषया समुद्धृत्य सूक्ष्मां पुस्तिकां मदपादिस्मत्रानुक्रमपि किंविवरणानानंदप्रबंध 

नुरोधादनुसंधेयम् तथाहि श्रीमद्भागवतात्स्कंधं पंचमं दशमं चसः श्रीवासुदेवमाहात्म्यं स्कांदाच्चाप्यलिख
त्पृथक् ततः श्रीभगवद्गीतां नीतिं वैदुरिकीं च सः ॥ विष्णोर्नामसहस्रं चैस लिखद्भारतात्त्रयम् ॥ ततः स धर्म
शास्त्राणां सर्वेषां सारमुत्तमम् ॥ एकामेवालिखत्सीसा याज्ञवल्क्यस्मृतिं पृथक् ॥ लिखित्वेतद्धरिः पित्रे चतुष्ट
यमदीदृशत् ॥ प्रसन्नस्तेन सोऽज्ञानात्तद्बुद्धिमतिमानुषीमिति ॥ ६२ ॥ संप्रति तस्य मार्गोल्लंघनप्रकारं निरूपय
ति आत्रामिति स्फुततरां श्रीः शोभा विद्यते ऽस्मिन्निति तथोक्तः ॥ तदस्यास्त्यस्मिन्निति मतुबिति मतुप् सत्त्वरगतिः

आत्राममैलविलाश्रितां ससरयमुत्तीर्य गच्छन्व्रती खेटान् खर्वटवाटिकाश्च नगरग्रामवृज्जादिच्युतम् ॥ स श्रीमा
न्सुमती ससत्वरगतिर्वत्मन्मरणं भियां स्थानं मानुषवर्जितं कतिपयैः प्रायदिनैर्धैर्यवान् ॥ ६३ ॥ शीघ्रगत्व
रः व्रती धैर्यवान् स्थिरचित्तोन्नतिवान् स्थिरा चित्तोन्नतिर्यातु तद्धैर्यमिति भूपालः सरयूं तत्संज्ञां नदीम् उत्ती
र्य उल्लंघ्य ऐलविलाश्रितां इडुविडो ऽपत्यमे इविडः तस्यापत्यमिति सणाजलयोरेकत्वस्मरणादैलविलोपि इडविल
स्यायाः अपत्यमिति वा विग्रहः तत्राह श्रीभा नदी सणजोत्कादित्वाद एतिति वा ऐलविलेन पुणपत्तनेश्वरेण आ
श्रितामधिष्ठिताम् यक्षैकपिंगैलविलश्रीदपुणपत्तनेश्वरा इस मरः आत्रामुत्तरदिशामुद्दिश्य तथा गच्छन्

सहरिः वर्त्मनि मार्गे खेटान् कर्बुकग्रामान् खर्वटान् गिरितटग्रामाः भृगुप्रोक्ताः वाणिकृतोयत्र तु ग्रामो नगरश्चैक 
तः स्थितम्। मिश्रं तु खर्वटं नाम नदीगिरिसमाश्रयमिति ते च वाटिकाः पूगपुष्पादिमय्यश्च ताश्च नगराणि पु
राणि वनगरं नगरी इंगः स्थानीयं पूः पुरी पुरमिति हलायुधः ग्रामाः भृगुप्रोक्ताः विप्राश्च विप्रभृत्याश्च यत्र
चैव वसंति ते स तु ग्रामः इति प्रोक्तः शूद्राणां वास एव चेति ते च व्रजा गोकुलानि च ताः किलाद यो यस्य रत्ना
द्युत्पत्तिस्थानभूता करादेस्तत्तथोक्तं च समतीत्य सम्यगतिक्रम्य भियां भयानां स्थानमाश्रयम् मानुष्यैर्वर्जि
क्रूरव्याघ्रवराहनागमहिषैर्नानाविधैस्तन्मृगैर्जुष्टं केसरिभिर्विचित्रपशुभिर्वन्यैश्च तैस्तैस्त्रिभिः। कासारैस्त
टिनीभिरंबुजवनैः कूजद्वयःसंचयैर्गोत्राजैः फलमूलभारविनतैर्लेभे स पन्नमुदम्॥६२॥ तं सत्कंटकमरण्यं
काननम् कतिपयैर्दिनैर्दिवसैः प्रापत्॥६३॥ क्रूरेति क्रूरा भयंकरा ये व्याघ्राः शार्दूलाश्च वराहाः क्रोडाश्च
नागाः हस्तिनश्च महिषाः सैरिभाश्च रक्तस्वलो वाहः पुलुलायः सैरिभो महः इति हैमः तैः नानाविधैर्बहुभेदव
द्भिर्मृगैश्च व ~~एवं कोडाश्च नागाः हस्तिनश्च महिषाः~~ मैरण्यो न्नवैर्विचित्रपशुभिश्च मयूरादिभिश्च तेजोधि
क्षेपाद्यसहनं अधिक्षेपावमानादेः प्रयुक्तस्य परेण यत् प्राणात्ययेप्यसहनं तत्तेजः समुदाहृतमिति भरतः ॥१६॥

नदस्तिरण्यामिति तथोक्तैः अस्मायामे धाम्न तो विनिरिति विनिः केसरिभिः सिंहैश्च अंबुजवनैः अंबुजा
नां कमलानां वनं येषु तथोक्तैः कासारैः सरोभिः कासारः सरसी सरः इत्यमरः तटिनीभिर्नदीभिश्च अथ नदी स
रित् तरंगिणी शैवलिनी तटिनी ह्रदिनी धुनी इत्यमरः कूजंति शब्दं कुर्वंति ये यानि वयांसि खगास्तेषां संचयाः समू
हास्तैश्च खगबाल्यादिनो विय इत्यमरः फलानि मूलानि पुष्पाणि च तेषां भारेण विनतैर्नम्रैः गोत्राः पृथिवी त
स्याः जाता गोत्राजा वृक्षास्तैश्च गोत्रा कुः पृथिवी पृथ्वी क्ष्मावनिर्मेदिनी मही इत्यमरः जुष्टं सेवितम् तदरण्यम्
सोऽतिक्रम्य वदान्य सज्जनरतिः सिद्धविस्मापनः प्रालेयाचलमंधकारहरणो रत्नं चाप धार्मिर्हरिः॥ ध्यातैः पीन
तया हृयंतमिव तं शृंगैः कुंतिकैर्बिभ्रतं प्रीतिं भंडिरिकाच गैरिकभवां कांतिं बहिर्वो ज्ज्वलाम्॥६४॥ पश्यन् स हरिः मुदं
हर्षम् लेभे प्रापत्॥६५॥ स इति वदान्य सज्जन रतिः वदान्यास्त्यागिनः वदान्यस्त्यागिवाग्मिनोरिति तत्पर्यकोशः तथा भू
ता ये सज्जनाः सत्पुरुषास्तेषु रतिः प्रीतिर्यस्य स तथोक्तः सिद्धविस्मापनः सिद्धानष्टांगयोगाभ्यासरतायेपुरुषा
स्तान् विस्मापयतीति तथोक्तः अंधकारहरणः अंधकारं जीवानामनाद्यविद्यावरणरूपं तमोहरतीनान्त्राय
ती ति तथोक्तः धार्मिः धर्मस्य धर्मावतारस्तेन पाडुर्भूतस्य हरिप्रसादस्यापत्यमिति तथोक्तः अतः इति नाज प्र

सपः सवर्णि वैर्योहरिः प्रीतत्यातद्दर्वोनाक्रादत्तयाहेतुभूतयाश्वांकुतिकैः श्वांकुताः पक्षिणः श्वाकुंतिपक्षि॰
शाकुनिश्वांकुतश्वाकुनहिज्ञाद्रुसंभरः तैषामिमेश्वाकुंतिकाः तैस्तथोक्तैः ध्वानैः श्वाद्वैः श्वाद्वे निनादनिनदध्वनिध्वा
नरवस्वनाद्रुसमरः भंदहरिम् आह्वयंतमाह्वानंकुर्वंतमिवस्थितम् गैरिकोधातुविशेषः संभूरुसन्निस्थानेय
स्यास्तांतथोक्ताम् भंदिरिकांरक्ताम् रक्ताभंदिरिकाचेतीडुकोशः कांतिंशोभाम् वहिरौलकंचनाडुक्तोनिःसृतां
प्रीतिंवातद्विषयमनुरागमिव ववापथातथैवैवंसाम्येद्रुसमरः बिभ्रतंदधतंचप्रालेयाचलंहैमाचलम् आ

इतिश्रीहरिसंभवेमहाकाव्येदर्यकेकविश्रीमद्दविसानंदवर्णिकृतेभगवतीबाल्यादिकिशोरवर्णननामाष्टमः
सर्गः ॥ ८ ॥ पद्यपदे अंधकारहरणेहरिः सूर्यश्च हरिर्वातार्कचंद्रेद्रयमोपेंद्रमरीचिषुइतिविश्वः अस्तम॰
स्ताचलम् आप ॥ ९४ ॥ इतिश्रीपदवाक्यप्रमाणपारावारीणधुरीणविश्वनाथभट्टात्मजदीनानाथशिष्यश्री
धर्मरक्षकवासुदेवश्रीसहजानंदस्वामिचरणकमलोपासकगोपालानंदमुनिसुतः प्रेरितमतिमाधवदाससत्प्र॰
दायस्यासावटकस्यानुंकन्यात्मनश्रीहरिकृष्णैकभक्तभोलानाथभट्टकृतौश्रीहरिसंभवकाव्यस्यविद्वज्ज॰
नाह्लादिनाख्यव्याख्यायामष्टमःसर्गः ॥ ८ ॥ लें॰ रावलजेवाप्रोरारजी सं॰ १९५६ महावदि ८ मेंथाणग्रामेसमाप्त ॥ ९५ ॥